# Activity ID: 1903204021

**B. A. 6th Semester (Programme) Examination, October 2020**

**Subject: Sanskrit**

**Course Code: APSNS 603GE-2** **Course ID: 60914**

**Course Title: Comprehension and Writing Skill**

**Full Marks: 16** **Time: 1 Hour**

**The figures in the margin indicate full marks.**

**Candidates are required to give their answers in their own words as far as practicable.**

1. **अधोलिखितेषु सन्दर्भेषु एकं सम्यक् पठित्वा तदन्ते प्रदत्तानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।** 10

(i) अस्ति गोदावरीतीरे विशाल: शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति स्म । अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत् " अद्य प्रातरेवानिष्टदर्शनं जातम्। न जाने किमनभिमतं दर्शयिष्यति।" तदनुसरणक्रमेण व्याकुलश्चलितः। अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान्कपोतान्प्रत्याह - " कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि।"

(a) शाल्मलीतरौ के कदा च निवसन्ति स्म ? 2

(b) वायसस्य नाम किम्? स कदा व्याधम् अपश्यत् ? 1+1

(c) व्याधं दृष्ट्वा वायसः किम् अचिन्तयत् ? 2

(d) पक्षिनिधनार्थं व्याधःकिम् अकरोत् ? 2

(e) कपोतराजः कदा कुत्र च तण्डुलकणान् अपश्यत् ? 2

(ii) अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म – “यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य स्वेच्छया भोजनं भविष्यति।” तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् “मया बुद्धिप्रभावादस्य मरणं साधयितव्यम्।” अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच- " देव! दृष्टिप्रसादं कुरु।" हस्ती व्रूते – “कस्त्वम्? कुतः समायातः? " सोऽवदत् - " जम्बुकोऽहम्। सर्वैर्निवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः। यद्विना राज्ञावस्थातुं न युक्तं तदत्राटवीराज्येऽभिषेक्तुं भवान्सर्वस्वामिगुणोपेतो निरूपितः।"

(a) कर्पूरतिलको कुत्र आसीत् ? 2

(b) कम् अवलोक्य शृगाला: चिन्तयन्ति स्म ? 2

(c) सर्वेशृगाला: किं चिन्तयन्ति स्म ? 2

(d) बृद्धशृगालेन किं प्रतिज्ञातम् ? 2

(e) बृद्धशृगाल: कर्पूरतिलकसमीपं गत्वा किम् अवदत् ? 2

**(iii)** अस्ति कान्यकुब्जविषये वीरसेनो नाम राजा। तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः। स च महाधनस्तरुण एकदा स्वनगरे भ्राम्यन्नतिप्रौढ़यौवनां लावण्यवतीं नाम वणिक्पुत्रवधूमालोकयामास। ततः स्वहर्म्यं गत्वा स्मराकुलमतिस्तस्याः कृते दूतीं प्रेषितवान्। सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्जरितहृदया तदेकचित्ताभवत्। अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच – “अहं पतिव्रता कथमेतस्मिन्नधर्मे पतिलङ्घने प्रवर्ते।”

(a) वीरसेन: कस्य नगरस्य राजा आसीत् ? 2

(b) तुङ्गबल: क: आसीत् ? 2

(c) तुङ्गबलो नाम राजपुत्र: कीदृशीं वनिक्पुत्रवधूम् आलोकयामास ? 2

(d) लावण्यवतीं दृष्ट्वा राजपुत्र: कां प्रेषितवान् ? 2

(e) दूतीवचनं श्रुत्वा लावण्यवती किम् उवाच ? 2

IV) अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम् । तच्छिखरप्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते । एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः खादितश्च । तत्पाणिपतिता घण्टा वानरैः प्राप्ता। ते च वानरास्तां घण्टामनुक्षणं वादयन्ति। ततो नगरजनैः स मनुष्यः खादितो दृष्टः । प्रतिक्षणं घण्टारवश्च श्रूयते । अनन्तरं "घण्टाकर्णः कुपितो मनुष्यान् खादति घण्टां च वादयतीत्युक्त्वा" सर्वे जनाः नगरात् पलायिताः ।

a. कुत्र घण्टाकर्णः प्रतिवसति स्म ? 2

b. कीदृशो जनः केन निहतः ? 2

c. कथं मनुष्या नगरात् पलायिता: ? 2

d. ब्रह्मपुराख्यं नगरं कुत्रास्ति? 2

e. घण्टा कैः प्राप्ता? 2

V) भूमिः आपः, वायुः, पृथ्वी, आकाशः तत्सर्वं मिलित्वा अस्माकं पर्यावरणं कथ्यते। विज्ञानस्य विकासेन यानि उपभोगसाधनानि यानि च अन्यानि अनेकानि उपकरणानि प्रकृतेः अनुकम्पया अस्माभिः उपलब्धानि तैः सर्वैः भोग्यवस्तुभिः अस्माकं जीवनं सुखसम्पन्नं जातम्।| परमेतस्यां प्रक्रियायाम् अस्माभिः पर्यावरणस्य महती हिंसा कृता। एतदतिरिक्तं स्वावश्यकताः पूरयितुं वनानां स्थाने भवनानि, यन्त्रशालाः नूतनाश्च मार्गाः अस्माभिः निर्मीयन्ते। सर्वकारः कठोरं दण्डम् आनीय एतेषाम् दुरभ्यासानां दूरीकरणाय प्रचेष्टां कुर्यात्। अन्यथा प्रकृतिः भूकम्पेन प्लावनेन अग्न्युत्पातेन स्वसामञ्जस्यविधानं कुर्यात् यत् मनुष्याणां कृते क्षतिकारकमेव।

a.कस्य विकासेन उपभोगसाधनानि लब्धानि? 2

b. कस्य महती हिंसा कृता? 2

c. केन अस्माकं जीवनं सुखसम्पन्नं जातम्? 2

d. "आप:" इति पदस्य पर्यायपदं किं? - तरुः/ आकाशः / जलम् / मनुष्यः 2

e. 'महती हिंसा" अत्र विशेषण पदं किं भवति? - महती/ हिंसा/ विशेषणपदं नास्ति 2

**2. अधोनिर्दिष्टेषु यथेच्छम् एकः समाधेयः।** 6

**a. एषु त्रिभिः अव्ययैः वाक्यनिर्माणं कुरुत –** 2X3=6

क) विना ख) सह ग) नमः घ) प्रति ङ) निकषा च) परितः

b. **एषु त्रिभिः पदैः वाक्यरचनं कुरुत -** 2X3=6

क) लता ख) चन्द्रम् ग) बालिकया घ) वृक्षात् ङ) नरान् च) फलानि

C. **एषु <u>त्रिभिः</u> धातुरूपैः वाक्यरचनं कुरुत -** 2X3=6

क) गच्छन्ति ख) पिबति ग) खादामि घ) पश्यतु ङ) अगच्छत् च) पठ

d. **एषु <u>त्रिभिः</u> अव्ययैः वाक्यनिर्माणं कुरुत -** 2X3=6

क) सदा ख) अलम् ग) यत्र घ) कुत्र ङ) सर्वदा च) सर्वत्र

e. **एषु <u>त्रिभिः</u> धातुरूपैः वाक्यरचनं कुरुत -** 2X3=6

क) धावन्ति ख) गायसि ग) अनृत्यन् घ) ददति ङ) अत्ति च) जहाति